# Shri Bala Nirguna Manasapuja Parabhavana Stotram

# શ્રીબાલાનિર્ગુણમાનસપૂજા પરાભાવનાસ્તોત્રમ્

## Document Information

Text title : bAlAnirguNamAnasapUjAparAbhAvanAstotram

File name : bAlAnirguNamAnasapUjAparAbhAvanAstotram.itx

Category : devii, dashamahAvidyA, devI, pUjA

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાનિર્ગુણમાનસપૂજા પરાભાવનાસ્તોત્રમ્

ધ્યાયામિ કથમિવ ત્વાં ધીવર્ત્મવિદૂરદિવ્યમહિમવતીમ્ ।
આવાહનં વિભોસ્તે દેવેશિ કથં કુતઃ સ્થાનાત્ ॥ ૧॥

કિયદાસનં પ્રકલ્પ્યં કૃતાસનાયાશ્ચ સર્વતોઽપિ શિવે ।
પાદ્યં કુતોઽર્ઘ્યમપિ વાઽઽપાદ્યં સર્વત્રપાણિપાદાયાઃ ॥ ૨॥

આચમનં તે સ્યાદપિ ભગવતિ નનુ સર્વતોમુખીનાયાઃ ।
મધુપર્કો વા કથમિહ મધુવૈરિણિ દર્શિતપ્રસાદાયાઃ ॥ ૩॥

સ્નાનેન કિં વિધેયં સલિલકૃતેનેહ નિત્યશુદ્ધાયાઃ ।
વસ્ત્રેણાપિ ન કાર્યં કાર્પાસીયેન હેમવસ્ત્રાયાઃ ॥ ૪॥

હૈમૈરાભરણૈર્વા ચમત્કૃતિઃ કા હિરણ્યવર્ણાયાઃ ।
રત્નાચલવાસિન્યાઃ ચિન્તામણિગેહગાયાસ્તે ॥ ૫॥

ગન્ધવતી હિ તનુસ્તે ગન્ધાઃ કિં નેશિ પૌનરુક્ત્યાય ।
પુષ્કરફલદાનોત્કાં પુષ્કરકુસુમેન પૂજયે કિં ત્વામ્ ॥ ૬॥

શમધનમૂલધનં ત્વં સકલેશ્વરી ભવસિ ધૂપિતા કેન ।
દીપઃ કથં શિખાવાન્ દીપ્યેત પુરઃ સ્વયમ્પ્રકાશાયાઃ ॥ ૭॥

અમૃતાત્મકં નિવેદિતમશનં કિં નામ નિત્યતૃપ્તાયાઃ ।
ત્વય્યામ્રેડિતમેતત્તામ્બૂલં યદિહ સુમુખરાગાયાઃ ॥ ૮॥

ઉપહારીભૂયાદિદમુમેઽદ્ય યન્મે વિચેષ્ટિતમશેષમ્ ।
નીરાજયામિ વિદ્યુન્નિભાં કથં વા ચિદાભાસામ્ ॥ ૯॥

પુષ્પાઞ્જલિઃ કુતસ્તે મૂલપ્રકૃતિસ્વરૂપાયાઃ ।
છત્રં નભોઽતિગાયાઃ ચામરમપ્યવિદિતશ્રમાયાસ્તે ॥ ૧૦॥

નૃત્યં પ્રથતાં કથમિવ ચિત્રં ભાયાન્મહાનટપુરન્ધ્યાઃ ।
ગીતં કિં કલભાષણજિતવાણીમધુરવીણાયાઃ ॥ ૧૧॥

વાદ્યં ડમરુભૃદીશે વાદયિતું તવ પુરોઽસ્તિ કા શક્તિઃ ।
અપરિચ્છિન્નાયાસ્તે જગદીશ્વરિ કઃ પ્રદક્ષિણવિધિર્વા ॥ ૧૨॥

સ્યુસ્તે નમાંસિ કથમિવ શઙ્કરિ પરિતોઽપિ વિદ્યમાનાયાઃ ।
વાચામગોચરીં ત્વાં વાચઃ પ્રસરૈઃ પ્રસાદયેયં વા ॥ ૧૩॥

કસ્મૈ વચ્મિ દશાં મે કસ્યેદુગ્ઘૃદયમસ્તિ શક્તિર્વા ।
કસ્ય બલં ચોદ્ધર્તું ક્લેશાત્ત્વામન્તરા દયાસિન્ધો ॥ ૧૪॥

યાચે નાભિનવં તે ચન્દ્રાપીડે મદમ્બ કિઞ્ચિદપિ ।
મહ્યં પ્રદેહિ ભગવતિ મદીયમેવ સ્વરૂપમાનન્દમ્ ॥ ૧૫॥

ભગવતિ બાલતયા વાઽભક્ત્યા વાપ્યાપદાકુલિતયા વા ।
મોહાવિષ્ટતયા વા માસ્તુ ચ તે મનસિ યદ્દુરુક્તં મે ॥ ૧૬॥

શ્રીબાલાનિર્ગુણમાનસપૂજા પરાભાવનાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Nirguna Manasapuja Parabhavana Stotram*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*